**असम्प्रति** अव्य० तिष्ठद्गु० स० समा० । १ अयोग्ये काले अनुपस्थितकाले च । "यच्चैव सम्प्रति दद्योयच्चैवासम्प्रति" शत० ब्रा० ।

**असम्बद्ध** न० सम्बद्धं परस्परमन्वितं न भवति सम्+बन्ध-क्त न०त०। अर्थानवबोधकेऽनन्विताऽर्थके १वाक्ये । "असंबद्धप्रलापस्य वाङ्मयं स्याच्चतुर्विधम्" मनुः यथा "यावज्जीवमहं मौनीत्यादि" वाक्यम् । २सम्बन्धशून्ये असङ्गते च त्रि०।

**असम्बद्धप्रलाप** पु० कर्म्म० । १असङ्गते २अप्रस्तुतस्य वा कथने, ३निष्प्रयोजने कथने च ।

**असम्बन्ध** पु० अभावे न०त० । १सम्बन्धाभावे "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः" भाषा० २परस्परमन्वयाभावे च "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" जै०सू० न०ब० । ३सम्बन्धशून्ये त्रि० ।"असंबन्धकृतश्चैव व्यवहारो न सिध्यति" या०स्मृतिः ।

**असम्बाध** त्रि० नास्ति सम्बाधा अन्योन्यं पीड़ा प्रतिबन्धो वा यत्र । १परस्परसंघर्षरूपपीड़ारहिते विरले, २बाधारहिते च । "असंबाधा देवनदी स्वर्गसम्पादिनी शुभा" भा०आ० प०। न सम्यग् बाधा अभावे न०त०। ३सम्यग्बाधाभावे ४चतुर्दशाक्षरपादके वृत्तभेदे च स्त्री मतौ नसौ गावक्षग्रहविरतिरसंबाधा" वृत्त०र० ।

**असम्भव** पु० अभावे न०त० । १सम्भवाभावे "अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्" य० ४०६० "निष्क्रियस्य तदसम्भवात्" सां०सू०न्यायोक्ते लक्ष्यमात्रे २लक्षणानुसरणे। असम्भववारणाय प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति व्याप्तिलक्षणे प्रतियोगितानवच्छेदकं साध्यतावच्छेदकमिति कैश्चिदुक्तम् । सम्भवः समावेशः ३तदभावे । सम्भवस्य प्रमाणान्तरमिति अष्टप्रमाणवादिनः पौराणिकाः । सांख्यादिभिस्तु अनुमाने एव तस्य गतार्थत्वमुक्तम् यथाह" सा०कौ०। "सम्भवस्तु यथा खार्य्यां द्रोणाढ़कप्रस्थाद्यवगमः स चानुमानमेव खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं सत् द्रोणादिसत्त्वमवगमयति" । व्याख्यातञ्चैतदस्माभिः । "खारीत्वं खारीपरिमाणं महापरिमाणेऽवान्तरपरिमाणसमावेशोऽनुभवसिद्धः तथा च खारीपरिमाणं द्रोणादिपरिमाणव्यापकमिति खारीत्वस्य द्रोणादिपरिमाणाविनाभूततया अनुमानेनैव खारीपरिमाणे द्रोणादिपरिमाणसिद्धिः" ।

**असम्भवत्** त्रि० सम्+भू-शतृ न०त० स्त्रियां ङीप् । असम्भवे वस्तुनि "असम्भवद्घनरसा शतालीपरिसेविता । करं न सहते राजन् ! भूमिर्नवबभूरिव" उद्भटः ।

**असम्भाव्य** त्रि० सम्+भू-कर्मणि णि० यत् । सम्भावाविषये वस्तुनि "असम्भाव्यं न वक्तव्यमिति" नीतिः। सम्+भू-णिच्-कर्मणि यत् असम्भाव्यमप्यत्र त्रि०। "असम्भाव्यं पराभवन्" अथ० ५,१८,१२, "तिर्य्यग्योनावसम्भाव्यमावश्यकमवस्थितः" भा० आदि०प० ।

**असम्भावना** स्त्री अभावे न०त० । सम्भावनाभावे । सम्भावना च शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः निश्चयप्रायऔत्कट्यापन्नसंशयश्च ।

**असम्भावनीय** त्रि० न०त० । सम्भावनानर्हे वस्तुनि ।

**असम्भूति** स्त्री सम्+भू-क्तिन् अभावे न०त०। १सम्भवाभावे सम्भूतिः कार्य्योत्पत्तिः सा नास्ति यस्याः। अव्याकृताख्ये प्रकृतिरूपे कारणे "अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते" यजु०४,६ ।"असम्भूतिः प्रकृतिः कारणम्" वेददी०।

**असम्भृत** त्रि० न०त०। १अयत्नसिद्धे "असम्भृतं मण्डनमङ्गयष्टेः" कुमा० । २असम्यक्पुष्टे च ।

**असम्भेद** पु० सम्भेदो मेलनं संसर्गः अन्योन्यरूपताप्राप्तिः भेदस्य अभावे न०त०१तदभावे न०ब०। २तच्छून्ये त्रि०।

**असम्भ्रम** पु० सम्भ्रमः औत्सुक्यहेतुककार्य्यत्वरा सम्यग् भ्रान्तिः भयहेतुकचित्तक्षोभश्च अभावे न०त० । १सम्भ्रमाभावे "शशंस तुल्यसत्वानां सैन्यघोषेऽप्यसम्भ्रमम्" रघुः । न०ब० । २सम्भ्रमशून्ये ।

**असम्मत** त्रि० न०त० । सम्मतभिन्ने अननुमते "असम्मतः कस्तव मुक्तिमार्गम्" कुमा० । [२तच्छून्ये त्रि० ।

**असम्मति** स्त्री अभावे न०त० । १सम्मत्यभावे । न०ब० ।

**असम्मित** त्रि० न०त० । अपरिमिते "तस्मादिमा अतिरिक्ता असम्मिता ओषधयः प्रजायन्ते" शत० ब्रा० ।

**असम्मुग्ध** त्रि० सम्+मुह-क्त न०त०।१अकृतसन्देहे २पाण्डित्याभिमानरहिते च।

**असम्मूढ** त्रि०न०त०। सम्मूढ़भिन्ने १स्थिरनिश्चये २भ्रान्तिशून्ये "असम्मूढः स मर्त्येषु" "स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः" इति च गीता ।

**असम्मृष्ट** त्रि० न०त० । १परस्परसंघर्षणशून्ये २बाधाशून्ये च "असंमृष्टोजायसे मात्रोः" ऋ० ५,११,३ । "असम्मृष्टः अबाधितः" भा०। ३संमार्ज्जनशून्ये च । "अग्निमग्नीत् संमृड्ढीत्यसंमृष्टमेव भवति सम्प्रेषितम्" शत०ब्रा० ।

**असम्मोह** पु० अभावे न०त० । १भ्रमाभावे । विरोधे न०त० प्रमात्मके यथार्थे २ज्ञाने "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं